CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 309

Title Śri Nārāyaṇopaniṣat.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

*Shastri Dinmanishankar Pustak-Bhandara*

No.: 309 Subject: Vedic Lit.

Title: Śri Nārāyaṇopaniṣat.

Author: — Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 6.3" by 4.1" Extent: 2 foll.

Language: Sanskrit Script: Devanāgari

Remarks: —

अथ

श्रीगणेशाय नमः ॥ नारायणोपनिषदारंभः ॥ हरिः ॐ ॥ ३०

॥ना० ॐ भद्रं कर्णेभिः शृणुयाम देवाः भद्रं पश्येमाक्षभिर्य
जत्राः ॥ स्थिरैरंगैस्तुष्टुवांसस्तनुभिर्व्यशेम देवहितं य
दायुः ॥ स्वस्ति न इंद्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववे
दाः ॥ स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पति
र्दधातु ॥ ॐ शांतिः शांतिः शांतिः हरिः ॐ ॥ ॐ अथ पुरुषो
ह वै नारायणोऽकामयत प्रजाः सृजेयेति ॥ मनः सर्वेंद्रि
याणि च खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी
नारायणात्प्राणो जायते ॥ नारायणादिंद्रो जायते ॥
नारायणाद्ब्रह्मा जायते ॥ नारायणाद्रुद्रो जायते ॥ नारा
नारायणादित्यो जायते

यणात्प्रजापतिः प्रजायते॥ नारायणाद्द्वादशादित्याः
रुद्रा वसवः सर्वाणि च छंदांसि॥ नारायणादेव समु
त्पद्यंते॥ नारायणात्प्रवर्तंते॥ नारायणात्प्रमीयंते॥
नारायणात्प्रलीयंते॥ नारायणात्परो हंतो॥ अथ पुरुषो
नारायणो ब्रह्मा नारायणः॥ शिवश्च नारायणः॥ श
क्रश्च नारायणः॥ कालश्च नारायणः॥ विश्वश्च नारायणः
दिशश्च नारायणः॥ ऊर्ध्वश्च नारायणः॥ अधश्च नारायणः
अंतर्बहिश्च नारायणः॥ सर्वं नारायणः॥ नारायण ए
वेदं॥ सर्वं यद्भूतं यच्च भव्यं अथ निष्कलंको निरंजनो
॥१॥ निर्विकल्पो निराख्यातः शुद्धो देव एको नारायणः न ॥१॥

ना० द्वितीयोऽस्ति कश्चित्य एवं वेद॥ स विष्णुरेव भवति॥ स ॐ
विष्णुरेव भवति॥ ॐमित्यग्रे व्याहरेत्॥ नम इति पश्चात्
५ नारायणायेत्युपरिष्टात्॥ ॐमित्येकाक्षरं नम इति द्वे अक्षरे
नारायणायेति पंचाक्षराणि एतद्वै नारायणस्याष्टाक्ष
रं पदं यो ह वै नारायणस्याष्टाक्षरं पदमध्येति अनुपब्रुव
न् सर्वमायुरेति विंदते प्राजापत्यं रायस्पोषं गौपत्यं॥ ततो
मृतत्वमश्नुते ततोमृतत्वमश्नुत इति॥ प्रत्यगानंदं ब्रह्मपु
रुषं प्रणवं॥ स्वरूपं अकार उकारो मकार इति॥ तानेक
धा समभवत्तत्समभवत्॥ तदेतदोमिति यामुक्त्वा मुच्य
ते॥ योगी जन्मसंसारबंधनात्॥ ॐ नमो नारायणाय

ति मंत्रोपासकः ॥ वैकुंठभवनं गमिष्यति तस्मादिदं पुरं
पुंडरीकं विज्ञानघनं तस्मात्तडिदाभमात्रं ब्रह्मण्यो देव
कीपुत्रो ब्रह्मण्यो मधुसूदन इति ॥ ॐ सर्वभूतस्थमे
कं वै नारायणं कारणपुरुषमकारणं परंब्रह्मों ॥ एत
दथर्वणोशिरोयोधीते सायमधीयानो दिवसकृतं पापं ना
शयति ॥ प्रातरधीयानो रात्रिकृतं पापं नाशयति ॥ सा
यं प्रातरधीयानोऽपापो भवति ॥ माध्यंदिनमादित्या
भिमुखोधियानः ॥ पंचमहापातकोपपातकात् ॥ प्रमु
च्यते ॥ उत्तरनारायणमेतत् अथर्वणशिखायोधिते ॥
सर्ववेदपारायणपुण्यं लभते ॥ श्रीनारायणसायुज्यमा
॥२॥ प्नोति इति अथर्वणशिखानारायणोपनिषत्समाप्त ॥ ॥२॥
॥ हरिः ॐ भद्रं कर्णेभिः शृणुयाम देवा ॥ ५ ॥